# shrIrAdhAkavacham

# શ્રીરાધાકવચમ્

## Document Information

Text title : shriiraadhaakavacham

File name : raadhaakavacham.itx

Category : kavacha, devii, rAdhA, maheshvarAnandasarasvatI, devI

Location : doc_devii

Author : maheshvara

Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Source : brahmavaivarta puraaNa

Latest update : August 15, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરાધાકવચમ્

મહેશ્વર ઉવાચ ।
શ્રીજગન્મઙ્ગલસ્યાસ્ય કવચસ્ય પ્રજાપતિઃ ॥ ૧॥

ઋષિશ્ચન્દોઽસ્ય ગાયત્રી દેવી રાસેશ્વરી સ્વયમ્ ।
શ્રીકૃષ્ણભક્તિસમ્પ્રાપ્તૌ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૨॥

શિષ્યાય કૃષ્ણભક્તાય બ્રહ્મણાય પ્રકાશ્યેત્ ।
શઠાય પરશિષ્યાય દત્ત્વા મૃત્યુમવાપ્નુયાત્ ॥ ૩॥

રાજ્યં દેયં શિરો દેયં ન દેયં કવચં પ્રિયે ।
કણ્ઠે ધૃતમિદં ભક્ત્યા કૃષ્ણેન પરમાત્મના ॥ ૪॥

મયા દૃષ્ટં ચ ગોલોકે બ્રહ્મણા વિષ્ણુના પુરા ।
ૐ રાધેતિ ચતુર્થ્યન્તં વહ્નિજાયાન્તમેવ ચ ॥ ૫॥

કૃષ્ણેનોપાસિતો મન્ત્રઃ કલ્પવૃક્ષઃ શિરોઽવતુ ।
ૐ હ્રીં શ્રીં રાધિકાઙેન્તં વહ્નિજાયાન્તમેવ ચ ॥ ૬॥

કપાલં નેત્રયુગ્મં ચ શ્રોત્રયુગ્મં સદાવતુ ।
ૐ રાં હ્રીં શ્રીં રાધિકેતિ ઙેન્તં વહ્નિ જાયાન્તમેવ ચ ॥ ૭॥

મસ્તકં કેશસંઘાંશ્ચ મન્ત્રરાજઃ સદાવતુ ।
ૐ રાં રાધેતિ ચતુર્થ્યન્તં વહ્નિજાયાન્તમેવ ચ ॥ ૮॥

સર્વસિદ્ધિપ્રદઃ પાતુ કપોલં નાસિકાં મુખમ્ ।
ક્લીં શ્રીં કૃષ્ણપ્રિયાઙેન્તં કણ્ઠં પાતુ નમોઽન્તકમ્ ॥ ૯॥

ૐ રાં રાસેશ્વરીઙેન્તં સ્કન્ધં પાતુ નમોઽન્તકમ્ ।
ૐ રાં રાસવિલાસિન્યૈ સ્વાહા પૃષ્ઠં સદાવતુ ॥ ૧૦॥

વૃન્દાવનવિલાસિન્યૈ સ્વાહા વક્ષઃ સદાવતુ ।
તુલસીવનવાસિન્યૈ સ્વાહા પાતુ નિતમ્બકમ્ ॥ ૧૧॥

કૃષ્ણપ્રાણાધિકાઙેન્તં સ્વાહાન્તં પ્રણવાદિકમ્ ।
પાદયુગ્મં ચ સર્વાઙ્ગં સંતતં પાતુ સર્વતઃ ॥ ૧૨॥

રાધા રક્ષતુ પ્રાચ્યાં ચ વહ્નૌ કૃષ્ણપ્રિયાવતુ ।
તુલસીવનવાસિન્યૈ સ્વાહા પાતુ નિતમ્બકમ્ ॥ ૧૩॥

પશ્ચિમે નિર્ગુણા પાતુ વાયવ્યે કૃષ્ણપૂજિતા ।
ઉત્તરે સંતતં પાતુ મૂલપ્રકૃતિરીશ્વરી ॥ ૧૪॥

સર્વેશ્વરી સદૈશાન્યાં પાતુ માં સર્વપૂજિતા ।
જલે સ્થલે ચાન્તરિક્ષે સ્વપ્ને જાગરણે તથા ॥ ૧૫॥

મહાવિષ્ણોશ્ચ જનની સર્વતઃ પાતુ સંતતમ્ ।
કવચં કથિતં દુર્ગે શ્રીજગન્મઙ્ગલં પરમ્ ॥ ૧૬॥

યસ્મૈ કસ્મૈ ન દાતવ્ય ગુઢાદ્ ગુઢતરં પરમ્ ।
તવ સ્નેહાન્મયાખ્યાતં પ્રવક્તં ન કસ્યચિત્ ॥ ૧૭॥

ગુરુમભ્યર્ચ્ય વિધિવદ્ વસ્ત્રાલંકારચન્દનૈઃ ।
કણ્ઠે વા દક્ષિણે બાહૌ ધૃત્વા વિષ્ણોસમો ભવેત્ ॥ ૧૮॥

શતલક્ષજપેનૈવ સિદ્ધં ચ કવચં ભવેત્ ।
યદિ સ્યાત્ સિદ્ધકવચો ન દગ્ધો વહ્નિના ભવેત્ ॥ ૧૯॥

એતસ્માત્ કવચાદ્ દુર્ગે રાજા દુર્યોધનઃ પુરા ।
વિશારદો જલસ્તમ્ભે વહ્નિસ્તમ્ભે ચ નિશ્ચિતમ્ ॥ ૨૦॥

મયા સનત્કુમારાય પુરા દત્તં ચ પુષ્કરે ।
સૂર્યપર્વણિ મેરૌ ચ સ સાન્દીપનયે દદૌ ॥ ૨૧॥

બલાય તેન દત્તં ચ દદૌ દુર્યોધનાય સઃ ।
કવચસ્ય પ્રસાદેન જીવન્મુક્તો ભવેન્નરઃ ॥ ૨૨॥

નિત્યં પઠતિ ભક્ત્યેદં તન્મન્ત્રોપાસકશ્ચ યઃ ।
વિષ્ણુતુલ્યો ભવેન્નિત્યં રાજસૂયફલં લભેત્ ॥ ૨૩॥

સ્નાનેન સર્વતીર્થાનાં સર્વદાનેન યત્ફલમ્ ।
સર્વવ્રતોપવાસે ચ પૃથિવ્યાશ્ચ પ્રદક્ષિણે ॥ ૨૪॥

સર્વયજ્ઞેષુ દીક્ષાયાં નિત્યં ચ સત્યરક્ષણે ।
નિત્યં શ્રીકૃષ્ણસેવાયાં કૃષ્ણનૈવેદ્યભક્ષણે ॥ ૨૫॥

પાઠે ચતુર્ણાં વેદાનાં યત્ફલં ચ લભેન્નરઃ ।
યત્ફલં લભતે નૂનં પઠનાત્ કવચસ્ય ચ ॥ ૨૬॥

રાજદ્વારે શ્મશાને ચ સિંહવ્યાઘ્રાન્વિતે વને ।
દાવાગ્નૌ સંકટે ચૈવ દસ્યુચૌરાન્વિતે ભયે ॥ ૨૭॥

કારાગારે વિપદ્ગ્રસ્તે ઘોરે ચ દૃઢબન્ધને ।
વ્યાધિયુક્તો ભવેન્મુક્તો ધારણાત્ કવચસ્ય ચ ॥ ૨૮॥

ઇત્યેતત્કથિતં દુર્ગે તવૈવેદં મહેશ્વરિ ।
ત્વમેવ સર્વરૂપા માં માયા પૃચ્છસિ માયયા ॥ ૨૯॥

શ્રીનારાયણ ઉવાચ ।
ઇત્યુક્ત્વા રાધિકાખ્યાનં સ્મારં ચ માધવમ્ ।
પુલકાઙ્કિતસર્વાઙ્ગઃ સાશ્રુનેત્રો બભુવ સઃ ॥ ૩૦॥

ન કૃષ્ણસદૃશો દેવો ન ગઙ્ગાસદૃશી સરિત્ ।
ન પુષ્કરસમં તીર્થં નાશ્રામો બ્રાહ્મણાત્ પર ॥ ૩૧॥

પરમાણુપરં સૂક્ષ્મં મહાવિષ્ણોઃ પરો મહાન્ ।
નભ પરં ચ વિસ્તીર્ણં યથા નાસ્ત્યેવ નારદ ॥ ૩૨॥

તથા ન વૈષ્ણવાદ્ જ્ઞાની યિગીન્દ્રઃ શંકરાત્ પરઃ ।
કામક્રોધલોભમોહા જિતાસ્તેનૈવ નારદ ॥ ૩૩॥

સ્વપ્ને જાગરણે શશ્વત્ કૃષ્ણધ્યાનરતઃ શિવઃ ।
યથા કૃષ્ણસ્તથા શમ્ભુર્ન ભેદો માધવેશયોઃ ॥ ૩૪॥

યથા શમ્ભુર્વૈષ્ણવેષુ યથા દેવેષુ માધવઃ ।
તથેદં કવચં વત્સ કવચેષુ પ્રશસ્તકમ્ ॥ ૩૫॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે શ્રીરાધિકાકવચં સમ્પૂર્નમ્ ।

---

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

*shrIrAdhAkavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*